श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चतुर्विंशः सर्गः ॥

## सीतया राक्षसीनां वचसोऽनङ्गीकरणं राक्षसीकर्तृकं तस्या भर्त्सनं च

ततः सीतां समस्तास्ता राक्षस्यो विकृताननाः।
परुषं परुषानर्हामूचुस्तद्वाक्यमप्रियम्॥ **5.24.1** ॥

किं त्वमन्तःपुरे सीते सर्वभूतमनोरमे।
महार्हशयनोपेते न वासमनुमन्यसे॥ **5.24.2** ॥

मानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे।
प्रत्याहर मनो रामान्नैवं जातु भविष्यति॥ **5.24.3** ॥

त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरम्।
भर्तारमुपसङ्गम्य विहरस्व यथासुखम्॥ **5.24.4** ॥

मानुषी मानुषं तं तु राममिच्छसि शोभने।
राज्याद् भ्रष्टमसिद्धार्थं विक्लवन्तमनिन्दिते॥ **5.24.5** ॥

राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा।
नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत्॥ **5.24.6** ॥

यदिदं लोकविद्विष्टमुदाहरत सङ्गताः।
नैतन्मनसि वाक्यं मे किल्बिषं प्रतितिष्ठति॥ **5.24.7** ॥

न मानुषी राक्षसस्य भार्या भवितुमर्हति।
कामं खादत मां सर्वा न करिष्यामि वो वचः॥ **5.24.8** ॥

दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः।
तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला॥ **5.24.9** ॥

यथा शची महाभागा शक्रं समुपतिष्ठति।
अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा॥ **5.24.10** ॥

लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा।
सावित्री सत्यवन्तं च कपिलं श्रीमती यथा॥ **5.24.11** ॥

सौदासं मदयन्तीव केशिनी सगरं यथा।
नैषधं दमयन्तीव भैमी पतिमनुव्रता॥ **5.24.12** ॥

तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता।
सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्च्छिताः।
भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः॥ **5.24.13** ॥

अवलीनः स निर्वाक्यो हनुमान् शिंशपाद्रुमे।
सीतां सन्तर्जयन्तीस्ता राक्षसीरशृणोत् कपिः॥ **5.24.14** ॥

तामभिक्रम्य संरब्धा वेपमानां समन्ततः।
भृशं संलिलिहुर्दीप्तान् प्रलम्बान् दशनच्छदान्॥ **5.24.15** ॥

ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान्।
नेयमर्हति भर्तारं रावणं राक्षसाधिपम्॥ **5.24.16** ॥

सा भर्त्स्यमाना भीमाभी राक्षसीभिर्वराङ्गना।
सा बाष्पमपमार्जन्ती शिंशपां तामुपागमत्॥ **5.24.17** ॥

ततस्तां शिंशपां सीता राक्षसीभिः समावृता।
अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता॥ **5.24.18** ॥

तां कृशां दीनवदनां मलिनाम्बरवासिनीम्।
भर्त्सयाञ्चक्रिरे भीमा राक्षस्यस्ताः समन्ततः॥ **5.24.19** ॥

ततस्तु विनता नाम राक्षसी भीमदर्शना।
अब्रवीत् कुपिताकारा कराला निर्णतोदरी॥ **5.24.20** ॥

सीते पर्याप्तमेतावद् भर्तुः स्नेहः प्रदर्शितः।
सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते॥ **5.24.21** ॥

परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः।
ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि॥ **5.24.22** ॥

रावणं भज भर्तारं भर्तारं सर्वरक्षसाम्।
विक्रान्तमापतन्तं च सुरेशमिव वासवम्॥ **5.24.23** ॥

दक्षिणं त्यागशीलं च सर्वस्य प्रियवादिनम्।
मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय॥ **5.24.24** ॥

दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता।
अद्यप्रभृति लोकानां सर्वेषामीश्वरी भव॥ **5.24.25** ॥

अग्नेः स्वाहा यथा देवी शची वेन्द्रस्य शोभने।
किं ते रामेण वैदेहि कृपणेन गतायुषा॥ **5.24.26** ॥

एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि।
अस्मिन् मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम्॥ **5.24.27** ॥

अन्या तु विकटा नाम लम्बमानपयोधरा।
अब्रवीत् कुपिता सीतां मुष्टिमुद्यम्य तर्जती॥ **5.24.28** ॥

बहून्यप्रतिरूपाणि वचनानि सुदुर्मते।
अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि॥ **5.24.29** ॥

न च नः कुरुषे वाक्यं हितं कालपुरस्कृतम्।
आनीतासि समुद्रस्य पारमन्यैर्दुरासदम्॥ **5.24.30** ॥

रावणान्तःपुरे घोरे प्रविष्टा चासि मैथिलि।
रावणस्य गृहे रुद्धा अस्माभिस्त्वभिरक्षिता॥ **5.24.31** ॥

न त्वां शक्तः परित्रातुमपि साक्षात् पुरन्दरः।
कुरुष्व हितवादिन्या वचनं मम मैथिलि॥ **5.24.32** ॥

अलमश्रुनिपातेन त्यज शोकमनर्थकम्।
भज प्रीतिं प्रहर्षं च त्यजन्ती नित्यदैन्यताम्॥ **5.24.33** ॥

सीते राक्षसराजेन परिक्रीड यथासुखम्।
जानीमहे यथा भीरु स्त्रीणां यौवनमध्रुवम्॥ **5.24.34** ॥

यावन्न ते व्यतिक्रामेत् तावत् सुखमवाप्नुहि।
उद्यानानि च रम्याणि पर्वतोपवनानि च॥ **5.24.35** ॥

सह राक्षसराजेन चर त्वं मदिरेक्षणे।
स्त्रीसहस्राणि ते देवि वशे स्थास्यन्ति सुन्दरि॥ **5.24.36** ॥

रावणं भज भर्तारं भर्तारं सर्वरक्षसाम्।
उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि॥ **5.24.37** ॥

यदि मे व्याहृतं वाक्यं न यथावत् करिष्यसि।
ततश्चण्डोदरी नाम राक्षसी क्रूरदर्शना॥ **5.24.38** ॥

भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत्।
इमां हरिणशावाक्षीं त्रासोत्कम्पपयोधराम्॥ **5.24.39** ॥

रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानयम्।
यकृत्प्लीहं महत् क्रोडं हृदयं च सबन्धनम्॥ **5.24.40** ॥

गात्राण्यपि तथा शीर्षं खादेयमिति मे मतिः।
ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत्॥ **5.24.41** ॥

कण्ठमस्या नृशंसायाः पीडयामः किमास्यते।
निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह॥ **5.24.42** ॥

नात्र कश्चन सन्देहः खादतेति स वक्ष्यति।
ततस्त्वजामुखी नाम राक्षसीवाक्यमब्रवीत्॥ **5.24.43** ॥

विशस्येमां ततः सर्वान् समान् कुरुत पिण्डकान्।
विभजाम ततः सर्वा विवादो मे न रोचते॥ **5.24.44** ॥

पेयमानीयतां क्षिप्रं माल्यं च विविधं बहु।
ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत्॥ **5.24.45** ॥

अजामुख्या यदुक्तं वै तदेव मम रोचते।
सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी॥ **5.24.46** ॥

मानुषं मांसमास्वाद्य नृत्यामोऽथ निकुम्भिलाम्।
एवं निर्भर्त्स्यमाना सा सीता सुरसुतोपमा।
राक्षसीभिर्विरूपाभिर्धैर्यमुत्सृज्य रोदिति॥ **5.24.47** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः॥